मार्कण्डेयपुराणम्/अध्यायः ०५१-०५५



Exported from Wikisource on २३ जनवरीमासः २०२४

एकपञ्चाशोऽध्यायः-५१

मार्कण्डेय उवाच

दुः सहस्याभवद्भार्या निर्माष्टिर्नाम नामतः ।
जाता कलेस्तु भार्यायामृतौ चाण्डालदर्शनात् ॥५१.१ ॥

तयोरपत्यान्यभवने जगद्व्यापीनि षोडश ।
अष्टौ कुमाराः कन्याश्च तथाष्टावतिभीषणाः ॥५१.२ ॥

तन्ताकृष्टिस्तथोक्तिश्च परिवर्तस्तथापरः ।
अङ्गध्रुक् शकुनिश्चैव गण्डप्रान्तरतिस्तथा ॥५१.३ ॥

गर्भहा सस्यहा चान्यः कुमारास्तनयास्तयोः ।
कन्याश्चान्यास्तथैवाष्टौ तासां नामानि मे शृणु ॥५१.४ ॥

नियोजिका वै प्रथमा तथैवान्या विरोधिनी ।
स्वयंहारकरी चैव भ्रामणी ऋतुहारिका ॥५१.५ ॥

स्मृतिबीजहरे चान्ये तयोः कन्येऽतिदारुणे ।
विद्वेषण्यष्टमी नाम कन्या लोकभयावहा ॥५१.६ ॥

एतासां कर्म वक्षयामि दोषप्रशमनञ्च यत् ।
अष्टानाञ्च कुमाराणां श्रुयतां द्विजसत्तम ॥५१.७ ॥

दन्ताकृष्टिः प्रसुप्तानां बालानां दशनस्थितः ।
करोति दन्तसंघर्षं चिकीर्षुर्दुः सहागमम् ॥५१.८ ॥

तस्योपशमनं कार्यं सुप्तस्य सितसर्षपैः ।
शयनस्योपरि क्षिप्तैर्मानुषैर्दशनोपरि ॥५१.९ ॥

सुवार्च्चलौषधीस्नानात्तथा सच्छास्त्रकीर्तनात् ।
उष्ट्रकण्टकखड्गास्थि-क्षौमवस्त्रविधारणात् ॥५१.१० ॥

तिष्ठत्यन्यकुमारस्तु तथास्त्त्वित्यसकृद् ब्रुवन् ।
शुभाशुभे नृणां युङ्क्ते तथोक्तिस्तच्च नान्यथा ॥५१.११ ॥

तस्माददुष्टं मङ्गल्यं वक्तव्यं पण्डितैः सदा ।
दुष्टे श्रुते तथैवोक्ते कीर्तनीयो जनार्दनः ॥५१.१२ ॥

चराचरगुरुर्ब्रह्मा या यस्य कुलदेवता ।
अन्यगर्भे परान् गर्भान् सदैव परिवर्तयन् ॥५१.१३ ॥

रतिमाप्नोति वाक्यञ्च विवक्षोरन्यदेव यत् ।
परिवर्तकसंज्ञोऽयं तस्यापि सितसर्षपैः ॥५१.१४ ॥

रक्षोघ्नमन्त्रजप्यैश्च रक्षां कुर्वीत तत्त्ववित् ।
अन्यश्चानिलवन्नृणामङ्गेषु स्फुरणोदितम् ॥५१.१५ ॥

शुभाशुभं समाचष्टे कुशैस्तस्याङ्गताडनम् ।
काकादिपक्षिसंस्थोऽन्यः श्वादेरङ्गगतोऽपि वा ॥५१.१६ ॥

शुभाशुभञ्च शकुनिः कुमारोऽन्यो ब्रवीति वै ।
तत्रापि दुष्टे व्याक्षेपः प्रारम्भत्याग एव च ॥५१.१७ ॥

शुभे द्रुततरं कार्यमिति प्राह प्रजापतिः ।
गण्डान्तेषु स्थितश्चान्यो मुहूर्तार्धं द्विजोत्तम ॥५१.१८ ॥

सर्वारम्भान् कुमारोऽत्ति शस्ताताञ्चानसूयताम् ।
विप्रोक्त्या देवतास्तुत्या मूलोत्खातेन च द्विज ॥५१.१९ ॥

गोमूत्रसर्षपस्त्रानैस्तद्दृक्षग्रहपूजनैः ।
पुनश्च धर्मोपनिषत्करणैः शास्त्रदर्शनैः ॥५१.२० ॥

अनज्ञया जन्मनश्च प्रशमं याति गण्डवान् ।
गर्भे स्त्रीणां तथान्यस्तु फलनाशी सुदारुणः ॥५१.२१ ॥

तस्य रक्षा सदा कार्या नित्यं शौचनिषेवणात् ।
प्रसिद्धमन्त्रलिखनाच्छस्तमाल्यादिधारणात् ॥५१.२२ ॥

विशुद्धगेहावसथादनायासाच्च वै द्विज ।
तथैव सस्यहा चान्यः सस्यर्धिमुपहन्ति यः ॥५१.२३ ॥

तस्यापि रक्षां कुर्वीत जीर्णोपानद्विधारणात् ।
तथापसव्यगमनाच्छाण्डालस्य प्रवेशनात् ॥५१.२४ ॥

बहिर्बलिप्रदानाच्च सोमाम्बुपरिकीर्तनात् ।
परदारपहद्रव्यहरणादिषु मानवान् ॥५१.२५ ॥

नियोजयति चैवान्यान् कन्या सा च नियोजिका ।
तस्याः पवित्रपठनात् क्रोधलोभादिवर्जनात् ॥५१.२६ ॥

नियोजयति मामिष्टविरोधाच्च विवर्जनम् ।
आक्रुष्टोऽन्येन मन्येत ताडितो वा नियोजिका ॥५१.२७ ॥

नियोजयत्येनमिति न गच्छेत्तद्वशं बुधः ।
परदारादिसंसर्गे चित्तमात्मानमेव च ॥५१.२८ ॥

नियोजयत्यत्र सा मामिति प्राज्ञो विचिन्तयेत् ।
विरोधं कुरुते चान्या दम्पत्योः प्रीयमाणयोः ॥५१.२९ ॥

बन्धूनां सुहृदां पित्रोः पुत्रैः सावर्णिकैश्च या ।
विरोधिनी सा तद्रक्षां कुर्वीत बलिकर्मणा ॥५१.३० ॥

तथातिवादसहनाच्छास्त्राचारनिषेवणात् ।
धान्यं खलाद् गृहाद् गोभ्यः पयः सर्पिस्तथापरा ॥५१.३१ ॥

समृद्धिमृद्धिमद्द्रव्यादपहिन्ति च कन्यका ।
सा स्वयंहारिकेत्युक्ता सदान्तर्धानतत्परा ॥५१.३२ ॥

महानसादर्धसिद्धमन्नागारस्थितं तथा ।
परिविश्यमाणञ्च सदा सार्धं भुङ्क्ते च भुञ्जता ॥५१.३३ ॥

उच्छेषणं मनुष्याणां हरत्यन्नञ्च दुर्हरा ।
कर्मान्तागारशालाभ्यः सिद्धर्धिं हरति द्विज ॥५१.३४ ॥

गोस्त्रीस्तनेभ्यश्च पयः क्षीरहारी सदैव सा ।
दध्नो घृतं तिलात्तैलं सुरागारात्तथा सुराम् ॥५१.३५ ॥

रागं कुसुम्भकादीनां कार्पासात् सूत्रमेव च ।
सा स्वयंहारिका नाम हरत्यविरतं द्विज ॥५१.३६ ॥

कुर्याच्छिखण्डिनोर्द्वन्द्वं रक्षार्थं कृत्रिमां स्त्रियम् ।
रक्षाश्चैव गृहे लेख्या वर्ज्याचो च्छिष्टता तथा ॥५१.३७ ॥

होमाग्निदेवताधूपभस्मना च परिष्क्रिया ।
कार्या क्षीरादिभाण्डानामेवं तद्रक्षणं स्मृतम् ॥५१.३८ ॥

उद्वेगं जनयत्यन्या एकस्थाननिवासिनः ।
पुरुषस्य तु या प्रोक्ता भ्रामणी सा तु कन्यका ॥५१.३९ ॥

तस्याथ रक्षां कुर्वीत विक्षिप्तैः सितसर्षपैः ।
आसने शयने चोर्व्यां यत्रास्ते स तु मानवः ॥५१.४० ॥

चिन्तयेच्च नरः पापा मामेषा दुष्टचेतना ।
भ्रामयत्यसकृज्जप्यं भुवः सूक्तं समाधिना ॥५१.४१ ॥

स्त्रीणां पुष्पं हरत्यन्या प्रवृत्तं सा तु कन्यका ।
तथाप्रवृत्तं सा ज्ञेया दौः सहा ऋतहारिका ॥५१.४२ ॥

कुर्वीत तीर्थदेवौकश्चैत्यपर्वतसानुषु ।
नदीसङ्गमखातेषु स्त्रपनं तत्प्रशान्यते ॥५१.४३ ॥

मन्त्रवित् कृततत्त्वज्ञः पर्वसूषसि च द्विज ।
चिकित्साज्ञश्च वै वैद्यः संप्रयुक्तैर्वरौषधैः ॥५१.४४ ॥

स्मृतिञ्चापहरत्यन्या स्त्रीणां सा स्मृतिहारिका ।
विविक्तदेशसेवित्वात्तस्याश्चोपशमो भवेत् ॥५१.४५ ॥

बीजापहारिणी चान्या स्त्रीपुंसोरतिभीषणा ।
मेध्यान्नभोजनैः स्नानैस्तस्याश्चोपशमो भवेत ॥५१.४६ ॥

अष्टमी द्वेषणी नाम कन्या लोकभयावहा ।
या करोति जनद्विष्टं नरं नारीमथापि वा ॥५१.४७ ॥

मधुक्षीरघृताक्तांस्तु शान्त्यर्थं होमयेत्तिलान् ।
कुर्वीत मित्रविन्दाञ्च तथेष्टिन्तत् प्रशान्यते ॥५१.४८ ॥

एतेषान्तु कुमाराणां कन्यानां द्विजसत्तम ।
अष्टत्रिंशदपत्यानि तेषां नामानि मे शृणु ॥५१.४९ ॥

दन्ताकृष्टेरभूत् कन्या विजल्पा कलहा तथा ।
अवज्ञानृतदुष्टोक्तिर्विजल्पा तत्प्रशान्तये ॥५१.५० ॥

तामेव चिन्तयेत् प्राज्ञः प्रयतश्च गृही भवेत् ।
कलहा कलहं गेहे करोत्यविरतं नृणाम् ॥५१.५१ ॥

कुटुम्बनाशहेतुः सा तत्प्रशान्तिं निशामय ।
दूर्वाङ्कुरान्मधुघृतक्षीराक्तान् बलिकर्मणि ॥५१.५२ ॥

विक्षिपेज्जुहुयाच्चैवानलं मित्रञ्च कीर्तयेत् ।
भूतानां मातृभिः सार्धं बालकानान्तु शान्तये ॥५१.५३ ॥

विद्यानां तपसाञ्चैव संयमस्य यमस्य च ।
कृष्यां वाणिज्यलाभे च शान्तिं कुर्वन्तु मे सदा ॥५१.५४ ॥

पूजिताश्च यथान्यायं तुष्टिं गच्छन्तु सर्वशः ।
कुष्माण्डा यातुधानाश्च ये चान्ये गणसंज्ञिताः ॥५१.५५ ॥

महादेवप्रसादेन महेश्वरमतेन च ।
सर्व एते नृणां नित्यं तुष्टिमाशु व्रजन्तु ते ॥५१.५६ ॥

तुष्टाः सर्वं निरस्यन्तु दुष्कृतं दुरनुष्ठितम् ।
महापताकजं सर्वं यच्चान्यद्विघ्नकारणम् ॥५१.५७ ॥

तेषामेव प्रसादेन विघ्ना नश्यन्तु सर्वशः ।
उद्वाहेषु च सर्वेषु वृद्धिकर्मसु चैव हि ॥५१.५८ ॥

पुण्यानुष्ठानयोगेषु गुरुदेवार्चनेषु च ।
जपयज्ञविधानेषु यात्रासु च चतुर्दश ॥५१.५९ ॥

शरीरारोग्यभोग्येषु सुखदानधनेषु च ।
वृद्धबालातुरेष्वेव शान्तिं कुर्वन्तु मे सदा ॥५१.६० ॥

सोमाम्बुपौ तथाम्भोधिः सविता चानिलानलौ ।
तथोक्तेः कालजिह्वोऽभूत् पुत्रस्तालनिकेतनः ॥५१.६१ ॥

स येषां रसनासंस्थास्तानसाधून् विबाधते ।
परिवर्तसुतौ द्वौ तु विरूपविकृतौ द्विज ॥५१.६२ ॥

तौ तु वृक्षाग्रपरिखाप्राकाराम्भोधिसंश्रयौ ।
गुर्विण्याः परिवर्तन्तौ कुरुतः पादपाणिषु ॥५१.६३ ॥

क्रौष्टुके परिवर्तःस्यात् गर्भस्यान्योदरात्ततः ।
न वृक्षं चैव नैवाद्रिं न प्राकारं महोदधिम् ॥५१.६४ ॥

परिखां वा समाक्रामेदबला गर्भधारिणी ।
अङ्घ्रिरुक् तनयं लेभे पिशुनं नाम नामतः ॥५१.६५ ॥

सोऽस्थिमज्जागतः पुंसां बलमत्त्यजितात्मनाम् ।
श्येन-काक-कपोतांश्च गृध्रोलूकैश्च वै सुतान् ॥५१.६६ ॥

अवाप शकुनिः पञ्च जगृहुस्तान् सुरासुराः ।
श्येनं जग्राह मृत्युश्च काकं कालो गृहीतवान् ॥५१.६७ ॥

उलूकं निरृतिश्चैव जग्राहातिभयावहम् ।
गृध्रं व्याधिस्तदीशोऽथ कपोतं च स्वयं यमः ॥५१.६८ ॥

एतेषामेव चैवोक्ता भूताः पापोपपादने ।
तस्माच्छ्येनादयो यस्य निलीयेयुः शिरस्यथ ॥५१.६९ ॥

तेनात्मरक्षणायालं शान्तिं कुर्याद्विजोत्तम ।
गेहे प्रसूतिरेतेषां तद्वन्नीडनिवेशनम् ॥५१.७० ॥

नरस्तं वर्जयेद् गेहं कपोताक्रान्तमस्तकम् ।
श्येनः कपोतो गृध्रश्च काकोलूकौ गृहे द्विज ॥५१.७१ ॥

प्रविष्टः कथयेदन्तं वसतां तत्र वेश्मनि ।
ईदृक् परित्यजेद् गेहं शान्तिं कुर्याच्च पण्डितः ॥५१.७२ ॥

स्वप्नेऽपि हि कपोतस्य दर्शनं न प्रशस्यते ।
षडपत्यानि कथ्यन्ते गण्डप्रान्तरतेस्तथा ॥५१.७३ ॥

स्त्रीणां रजस्यवस्थानं तेषां कालांश्च मे शृणु ।
चत्वार्यहानि पूर्वाणि तथैवान्यत् त्रयोदश ॥५१.७४ ॥

एकादश तथैवान्यदपत्यं तस्य वै दिने ।
अन्यद्दिनाभिगमने श्राद्धदाने तथापरे ॥५१.७५ ॥

पर्वस्वथान्यत् तस्मात्तु वर्ज्यान्येतानि पण्डितैः ।
गर्भहन्तुः सुतो निघ्नो मोहनी चापि कन्यका ॥५१.७६ ॥

प्रविश्य गर्भमत्त्येको भुक्त्वा मोहयतेऽपरा ।
जायन्ते मोहनात्तस्याः सर्पमण्डूककच्छपाः ॥५१.७७ ॥

सरीसृपाणि चान्यानि पुरीषमथवा पुनः ।
षण्मासान् गुर्विणीं मांसमश्नुवानामसंयताम् ॥५१.७८ ॥

वृक्षच्छायाश्रयां रात्रावथवा त्रिचतुष्पथे ।
श्मशानकटभूमिष्ठामुत्तरीयविवर्जिताम् ॥५१.७९ ॥

रुदमानां निशीथेऽथ आविशेत्तामसौ स्त्रियम् ।
शस्यहन्तुस्तथैवैकः क्षुद्रको नाम नामतः ॥५१.८० ॥

शस्यर्धिं स सदा हन्ति लब्ध्वा रन्ध्रं शृणुष्व तत् ।
अमङ्गल्यदिनारम्भे अतृप्तो वपते च यः ॥५१.८१ ॥

क्षेत्रेष्वनुप्रवेशं वै करोत्यन्तोपसङ्गिषु ।
तस्मात् कल्पः सुप्रशस्ते दिनेऽभ्यर्च्य निशाकरम् ॥५१.८२ ॥

कुर्यादारम्भमुत्तिञ्च हृष्टस्तुष्टः सहायवान् ।
नियोजिकेति या कन्या दुः सहस्य मयोदिता ॥५१. ८३ ॥

जातं प्रचोदिकासंज्ञं तस्याः कन्याचतुष्टयम् ।
मत्तोन्मत्तप्रमत्तास्तु नरान् नारीस्तु ताः सदा ॥५१.८४ ॥

समाविशन्ति नाशाय चोदयन्तीह दारुणम् ।
अधर्मं धर्मरूपेण कामञ्चाकामरूपिणम् ॥५१.८५ ॥

अनर्थञ्चार्थरूपेण मोक्षञ्चामोक्षरूपिणम् ।
दुर्विनीता विना शौचं दर्शयन्ति पृथङ्नरान् ॥५१.८६ ॥

भ्रश्यन्त्याभिः प्रविष्टाभिः पुरुषार्थात् पृथङ्नराः ।
तासां प्रवेशश्च गृहे संध्यारक्ते ह्यथाम्बरे ॥५१.८७ ॥

धाताविधात्रोश्च बलिर्यत्र काले न दीयते ।
भुञ्जतां पिबतां वापि सङ्गिभिर्जलविप्रुषैः ॥५१.८८ ॥

नवनारीषु संक्रान्तिस्तासामाश्वभिजायते ।
विरोधिन्यास्त्रयः पुत्राश्चोदको ग्राहकस्तथा ॥५१.८९ ॥

तमः प्रच्छादकश्चान्यस्तत्स्वरूपं शृणुष्व मे ।
प्रदीपदैलसंसर्गदूषिते लङ्घिते खले ॥५१.९० ॥

मुषलोलूखले यत्र पादुके वासने स्त्रियः ।
शूर्पदात्रादिकं यत्र पदाकृष्य तथासनम् ॥५१.९१ ॥

यत्रोपलिप्तञ्चानर्च्य विहारः क्रियते गृहे ।
दर्वीमुखेन यत्राग्निराहृतोऽन्यत्र नीयते ॥५१.९२ ॥

विरोधिनीसुतास्तत्र विजृम्भन्ते प्रचोदिताः ।
एको जिह्वागतः पुंसां स्त्रीणाञ्चालीकसत्यवान् ॥५१.९३ ॥

चोदको नाम स प्रोक्तः पैशुन्यं कुरुते गृहे ।
अवधानगतश्चान्यः श्रवणस्थोऽतिदुर्मतिः ॥५१.९४ ॥

करोति ग्रहणन्तेषां वचसां ग्राहकस्तु सः ।
आक्रम्यान्यो मनो नृणां तमसाच्छाद्य दुर्मतिः ॥५१.९५ ॥

क्रोधं जनयते यस्तु तमः प्रच्छादकस्तु सः ।
स्वयंहार्यास्तु चौर्येण जनितन्तनयत्रयम् ॥५१.९६ ॥

सर्वहार्यर्धहारी च वीर्यहारी तथैव च ।
अनाचान्तगृहेष्वेते मन्दाचारगृहेषु च ॥५१.९७ ॥

अप्रक्षालितपादेषु प्रविशत्सु महानसम् ।
खलेषु गोष्ठेषु च वै द्रोहो येषु गृहेषु वै ॥५१.९८ ॥

तेषु सर्वे यथान्यायं विहरन्ति रमन्ति च ।
भ्रामण्यास्तनयस्त्वेकः काकजङ्घ इति स्मृतः ॥५१.९९ ॥

तेनाविष्टो रतिं सर्वो नैव प्राप्नोति वै पुरे ।
भुञ्जन् यो गायते मैत्रे गायते हसते च यः ॥५१.१०० ॥

सन्ध्यामैथुनिनञ्चैव नरमाविशति द्विज ।
कन्यात्रयं प्रसूता सा या कन्या ऋतुहारिणी ॥५१.१०१ ॥

एका कुचहरा कन्या अन्या व्यञ्जनहारिका ।
तृतीया तु समाख्याता कन्यका जातहारिणी ॥५१.१०२ ॥

यस्या न क्रियते सर्वः सम्यग् वैवाहिको विधिः ।
कालातीतोऽथवा तस्या हरत्येका कुचद्वयम् ॥५१.१०३ ॥

सम्यक् श्राद्धमदत्त्वा च तथानर्च्य च मातरम् ।
विवाहितायाः कन्याया हरति व्यञ्जनं तथा ॥५१.१०४ ॥

अग्न्यम्बुशून्ये च तथा विधूपे सूतिकागृहे ।
अदीपशस्त्रमुसले भूतिसर्षपवर्जिते ॥५१.१०५ ॥

अनुप्रविश्य सा जातमपहृत्यात्मसम्भवम् ।
क्षणप्रसविनी बालं तत्रैवोत्सृजते द्विज ॥५१.१०६ ॥

सा जातहारिणी नाम सुघोरा पिशिताशना ।
तस्मात् संरक्षणं कार्यं यत्नतः सूतिकागृहे ॥५१.१०७ ॥

स्मृतिञ्चाप्रयतानाञ्च शून्यागारनिषेवणात् ।
अपहन्ति सुतस्तस्याः प्रचण्डो नाम नामतः ॥५१.१०८ ॥

पौत्रेभ्यस्तस्य संभूता लीकाः शतसहस्रशः ।
चण्डालयोनयश्चाष्टौ दण्डपाशातिभीषणाः ॥५१.१०९ ॥

क्षुधाविष्टास्ततो लीकास्ताश्च चण्डालयोनयः ।
अभ्यधावन्त चान्योन्यमत्तुकामाः परस्परम् ॥५१.११० ॥

प्रचण्डो वारियित्वा तु तास्ताश्चण्डालयोनयः ।
समये स्थापयामास यादृशे तादृशं शृणु ॥५१.१११ ॥

अद्यप्रभृति लीकानामावासं यो हि दास्यति ।
दण्डं तस्याहमतुलं पातयिष्ये न संशयः ॥५१.११२ ॥

चण्डालयोन्योऽवसथे लीका या प्रसविष्यति ।
तस्याश्च सन्तिः पूर्वा सा च सद्यो नशिष्यति ॥५१.११३ ॥

प्रसूते कन्यके द्वे तु स्त्रीपुंसोर्बीजहारिणी ।
वातरूपामरूपाञ्च तस्याः प्रहरणन्तु ते ॥५१.११४ ॥

वातरूपा निषेकान्ते सा यस्मै क्षिपते सुतम् ।
स पुमान् वातशुक्रत्वं प्रयाति वनितापि वा ॥५१.११५ ॥

तथैव गच्छतः सद्यो निर्बीजत्वमरूपया ।
अस्नाताशी नरो यो वै तथैव पिशिताशनः ॥५१.११६ ॥

विद्वेषिणी तु या कन्या भृकुटीकुटिलानना ।
तस्या द्वौ तनयौ पुंसामपकारप्रकाशकौ ॥५१.११७ ॥

निर्बीजत्वं नरो याति नारी वा शौचवर्जिता ।
पैशुन्याभिरतं लोलमसज्जननिषेवणम् ॥५१.११८ ॥

पुरुषद्वेषिणश्चैतौ नारमाक्रम्य तिष्ठतः ।
मात्रा भ्रात्रा तथा मित्रैरभीष्टैः स्वजनैः परैः ॥५१.११९ ॥

विद्विष्टो नाशमायाति पुरुषो धर्मतोऽथतः ।
एकस्तु स्वगुणांल्लोके प्रकाशयति पापकृत् ॥५१.१२० ॥

द्वितीयस्तु गुणान् मैत्रीं लोकस्थामपकर्षति ।
इत्येते दौः सहाः सर्वे यक्ष्मणः सन्ततावथ ।
पापाचाराः समाख्याता यैर्व्याप्तमखिलं जगत् ॥५१.१२१ ॥

इति श्रीमार्कण्डेयपुराणे दुःसहोत्पतिसमापनं
नामैकपञ्चाशौऽध्यायः

द्विपञ्चाशोऽध्यायः-५२

मार्कण्डेय उवाच

इत्येष तामसः सर्गो ब्रह्मणोऽव्यक्तजन्मनः ।
रुद्रसर्गं प्रवक्षयामि तन्मे निगदतः शृणु ॥५२.१ ॥

तनयाश्च तथैवाष्टौ पत्न्यः पुत्राश्च ते तथा ।
कल्पादावात्मनस्तुल्यं सुतं प्रध्यायतः प्रभोः ॥५२.२ ॥

प्रादुरासीदथाङ्केऽस्य कुमारो नीललोहितः ।
रुरोद सुस्वरं सोऽथ द्रवंश्च द्विजसत्तम ॥५२.३ ॥

किं रोदिषीति तं ब्रह्मा रुदन्तं प्रत्युवाच ह ।
नाम देहीति तं सोऽथ प्रत्युवाच जगत्पतिम् ॥५२.४ ॥

रुद्रस्त्वं देव ! नाम्नासि मा रोदीर्धैर्यमावह ।
एवमुक्तस्ततः सोऽथ सप्तकृत्वो रुरोद ह ॥५२.५ ॥

ततोऽन्यानि ददौ तस्मै सप्त नामानि वै प्रभुः ।
स्थानानि चैषामष्टानां पत्नीः पुत्रांश्च वै द्विज ॥५२.६ ॥

भवं शर्वं तथेशानं तथा पशुपतिं प्रभुः ।
भीममुग्रं महादेवमुवाच स पितामहः ॥५२.७ ॥

चक्रे नामान्यथैतानि स्थानान्येषाञ्चकार ह ।
सूर्यो जलं मही वह्निर्वायुराकाशमेव च ॥५२.८ ॥

दीक्षितो ब्राह्मणः सोम इत्येतास्तनवः क्रमात् ।
सुवर्चला तथैवोमा विकेशी चापरा स्वधा ॥५२.९ ॥

स्वाहा दिशस्तथा दीक्षा रोहिणी च यथाक्रमम् ।
सूर्यादीनां द्विजश्रेष्ठ ! रुद्राद्यैर्नामभिः सह ॥५२.१० ॥

शनैश्चरस्तथा शुक्रो लोहिताङ्गो मनोजवः ।
स्कन्दः सर्गोऽथ सन्तानो बुधश्चानुक्रमात् सुतः ॥५२.११ ॥

एवम्प्रकारो रुद्रोऽसौ सतीं भार्यामविन्दत ।
दक्षकोपाच्च तत्याज सा सती स्वं कलेवरम् ॥५२.१२ ॥

हिमवद्दुहिता साभून्मेनायां द्विजसत्तम ।
तस्या भ्राता तु मैनाकः सखाम्भोधेरनुत्तमः ॥५२.१३ ॥

उपयेमे पुनश्चैनामनन्यां भगवान् भवः ।
देवौ धाताविधातारौ भृगोः ख्यातिरसूयत ॥५२.१४ ॥

श्रियश्च देवदेवस्य पत्नी नारायणास्य या ।
आयातिर्नियतिश्चैव मेरोः कन्ये महात्मनः ॥५२.१५ ॥

धाताविधात्रोस्ते भार्ये तयोर्जातौ सुतावुभौ ।
प्राणश्चैव मृकण्डुश्च पिता मम महायशाः ॥५२.१६ ॥

मनस्विन्यामहं तस्मात् पुत्रो वेदशिरा मम ।
धूम्रवत्यां समभवत् प्राणस्यापि निबोध मे ॥५२.१७ ॥

प्राणस्य द्युतिमान् पुत्र उत्पन्नस्तस्य चात्मजः ।
अजराश्च तयोः पुत्राः पौत्राश्च बहवोऽभवन् ॥५२.१८ ॥

पत्नी मरीचेः सम्भूतिः पौर्णमासमसूयत ।
विरजाः पर्वतश्चैव तस्य पुत्रौ महात्मनः ॥५२.१९ ॥

तयोः पुत्रांस्तु वक्षयेऽहं वंशसंकीर्तने द्विज ।
स्मृतिश्चाङ्गिरसः पत्नी प्रसूता कन्यकास्तथा ॥५२.२० ॥

सिनीवाली कुहूश्चैव राका भानुमती तथा ।
अनसूया तथैवात्रेर्जज्ञे पुत्रानकल्पषान् ॥५२.२१ ॥

सोमं दुर्वाससञ्चैव दत्तात्रेयञ्च योगिनम् ।
प्रीत्यां पुलस्त्यभार्यायां दत्तोऽन्यस्तत्सुतोऽभवत् ॥५२.२२ ॥

पूर्वजन्मनि सोऽगस्त्यः स्मृतः स्वायम्भुवेऽन्तरे ।
कर्दमश्चार्ववीरश्च सहिष्णुश्च सुतत्रयम् ॥५२.२३ ॥

क्षमा तु सुषुवे भार्या पुलहस्य प्रजापतेः ।
क्रतोस्तु सन्नतिर्भार्या बालखिल्यानसूयत ॥५२.२४ ॥

षष्टिर्यानि सहस्राणि ऋषीणामूर्ध्वरेतसाम् ।
ऊर्जायान्तु वसिष्ठस्य सप्ताजायन्त वै सुताः ॥५२.२५ ॥

रजोगात्रोर्ध्वबाहुश्च सबलश्चानघस्तथा ।
सुतपाः शुक्र इत्येते सर्वे सप्तर्षयः स्मृताः ॥५२.२६ ॥

योऽसावग्निरभीमानी ब्रह्मणस्तनयोऽग्रजः ।
तस्मात् स्वाहा सुतान् लेभे त्रीनुदारौजसो द्विज ॥५२.२७ ॥

पावकं पवमानञ्च शुचिञ्चापि जलाशिनम् ।
तेषान्तु सन्तातावन्ये चत्वारिंशच्च पञ्च च ॥५२.२८ ॥

कथ्यन्ते बहुशश्चैते पिता पुत्रत्रयञ्च यत् ।
एवमेकोनपञ्चाशद् दुर्जयाः परिकीर्तिताः ॥५२.२९ ॥

पितरो ब्रह्मणा सृष्टा ये व्याख्याता मया तव ।
अग्निष्वात्ता बर्हिषदोऽनग्नयः साग्नयश्च ये ॥५२.३० ॥

तेभ्यः स्वधा सुते जज्ञे मेनां वै धारिणीं तथा ।
ते उभे ब्रह्मवादिन्यौ योगिन्यौ चाप्युभे द्विज ॥५२.३१ ॥

उत्तमज्ञानसंपन्ने सर्वैः समुदिते गुणैः ।
इत्येषा दक्षकन्यानां कथितापत्यसंततिः ।
श्रद्धावान् संस्मरन्नित्यं प्रजावानभिजायते ॥५२.३२ ॥

इति श्रीमार्कण्डेयपुराणे रुद्रसर्गाभिधानो नाम

द्विपञ्चाशोऽध्यायः

त्रिपञ्चाशोऽध्यायः-५३

क्रौष्टुकिरुवाच

स्वायम्भुवं त्वयाख्यातमेतन्मन्वन्तरञ्च यत् ।
तदहं भगवन् ! सम्यक् श्रोतुमिच्छामि कथ्यताम् ॥५३.१ ॥

मन्वन्तरप्रमाणञ्च देवा देवर्षयस्तथा ।
ये च क्षितीशा भगवन् ! देवेन्द्रश्चैव यस्तथा ॥५३.२ ॥

मार्कण्डेय उवाच

मन्वन्तराणां संख्याता साधिका ह्येकसप्ततिः ।
मानुषेण प्रमाणेन शृणु मन्वन्तरञ्च मे ॥५३.३ ॥

त्रिंशत्कोट्यस्तु संख्याताः सहस्राणि च विंशतिः ।
सप्तषष्टिस्तथान्यानि नियुतानि च संख्यया ॥५३.४ ॥

मन्वन्तरप्रमाणञ्च इत्येतत् साधिकं विना ।
अष्टौ शतसहस्राणि दिव्यया संख्यया स्मृतम् ॥५३.५ ॥

द्विपञ्चाशत्तथान्यानि सहस्राण्यधिकानि च ।
स्वायम्भुवो मनुः पूर्वं मनुः स्वारोचिषस्तथा ॥५३.६ ॥

औत्तमस्तामसश्चैव रैवतश्चाक्षुषस्तथा ।
षडेते मनवोऽतीतास्तथा वैवस्वतोऽधुना ॥५३.७ ॥

सावर्णिः पञ्च रौच्याश्च भौत्याश्चागामिनस्त्वमी ।
एतेषां विस्तरं भूयो मन्वन्तरपरिग्रहे ॥५३.८ ॥

वक्षये देवानृषींश्चैव यक्षेन्द्राः पितरश्च ये ।
उत्पत्तिं संग्रहं ब्रह्मन् ! श्रूयतामस्य सन्ततिः ॥५३.९ ॥

यच्च तेषामभूत् क्षेत्रं तत्पुत्राणां महात्मनाम् ।
मनोः स्वायम्भुवस्यासन् दश पुत्रास्तु तत्समाः ॥५३.१० ॥

यैरियं पृथिवी सर्वा सप्तद्वीपा सपर्वता ।
ससमुद्राकरवती प्रतिवर्षं निवेशिता ॥५३.११ ॥

ससमुद्राकरवती प्रतिवर्षं त्रेतायुगे तथा ।
प्रियव्रतस्य पुत्रैस्तैः पौत्रैः स्वायम्भुवस्य च ॥५३.१२ ॥

प्रियव्रतात् प्रजावत्यां वीरात् कन्या व्यजायत ।
कन्या सा तु महाभागा कर्दमस्य प्रजापते ॥५३.१३ ॥

कन्ये द्वे दश पुत्रांश्च सम्राट्कुक्षी च ते उभे ।
तयोर्वै भ्रातरः शूराः प्रजापतिसमा दश ॥५३.१४ ॥

आग्नीध्रो मेधातिथिश्च वपुष्मांश्च तथापरः ।
ज्योतिष्मान्द्युतिमान् भव्यः सवनः सप्त एव ते ॥५३.१५ ॥

प्रियव्रतोऽभ्यषिञ्चत्तान् सप्त सप्तसु पार्थिवान् ।
द्वीपेषु तेन धर्मेण द्वीपांश्चैव निबोध मे ॥५३.१६ ॥

जम्बुद्वीपे तथाग्नीध्रं राजानं कृतवान् पिता ।
प्लक्षद्वीपेश्वरश्चापि तेन मेधातिथिः कृतः ॥५३.१७॥

शाल्मलेस्तु वपुष्मन्तं ज्योतिष्मन्तं कुशाह्वये ।
क्रौञ्चद्वीपे द्युतिमन्तं भव्यं शाकाह्वयेश्वरम् ॥५३.१८॥

पुष्कराधिपतिञ्चापि सवनं कृतवान् सुतम् ।
महावीतो धातकिश्च पुष्कराधिपतेः सुतौ ॥५३.१९॥

द्विधा कृत्वा तयोर्वर्षं पुष्करे संन्यवेशयत् ।
भव्यस्य पुत्राः सप्तासन्नामतस्तान्निबोध मे ॥५३.२०॥

जलदश्च कुमारश्च सुकुमारो मनीवकः ।
कुशोत्तरोऽथ मेधावी सप्तमस्तु महाद्रुमः ॥५३.२१॥

तन्नामकानि वर्षाणि शाकद्वीपे चकार सः ।
तथा द्युतिमतः सप्त पुत्रास्तांश्च निबोध मे ॥५३.२२॥

कुशलो मनुगश्चोष्णः प्राकरश्चार्थकारकः ।
मुनिश्च दुन्दुभिश्चैव सप्तमः परिकीर्तितः ॥५३.२३॥

तेषां स्वनामधेयानि क्रौञ्चद्वीपे तथाभवन् ।
ज्योतिष्मतः कुशद्वीपे पुत्रनामाङ्कितानि वै ॥५३.२४॥

तत्रापि सप्त वर्षापि तेषां नामानि मे शृणु ।
उद्भिदं वैष्णवञ्चैव सुरथं लम्बनं तथा ॥५३.२५॥

धृतिमत् प्राकरञ्चैव कापिलं चापि सप्तमम् ।
वपुष्मतः सुताः सप्त शाल्मलेशस्य चाभवन् ॥५३.२६॥

श्वेतश्च हरितश्चैव जीमूतो रोहितस्तथा ।
वैद्युतो मानसश्चैव केतुमान् सप्तमस्तथा ॥५३.२७ ॥

तथैव शाल्मलेस्तेषां समनामानि सप्त वै ।
सप्त मेधातिथेः पुत्राः प्लक्षद्वीपेश्वरस्य वै ॥५३.२८ ॥

येषां नामाङ्गितैर्वर्षैः प्लक्षद्वीपस्तु सप्तधा ।
पूर्वं शाकभवं वर्षं शिशिरन्तु सुखोदयम् ॥५३.२९ ॥

आनन्दञ्च शिवञ्चैव क्षेमकञ्च ध्रुवन्तथा ।
प्लक्षद्वीपादिभूतेषु शाकद्वीपान्तिमेषु वै ॥५३.३० ॥

ज्ञेयः पञ्चसु धर्मश्च वर्णाश्रमविभागजः ।
नित्यः स्वाभाविकश्चैव अहिंसाविधिवर्धितः ॥५३.३१ ॥

पञ्चस्वेतेषु वर्षेषु सर्वसाधारणः स्मृतः ।
अग्नीध्राय पिता पूर्वं जम्बुद्वीपं ददौ द्विज ॥५३.३२ ॥

तस्य पुत्रा बभूवुर्हि प्रजापतिसमा नव ।
ज्येष्ठो नाबिरिति ख्यातस्तस्य किंपुरुषोऽनुजः ॥५३.३३ ॥

हरिवर्षस्तृतीयस्तु चतुर्थोऽभूदिलावृतः ।
वश्यश्च पञ्चमः पुत्रो हिरण्यः षष्ठ उच्यते ॥५३.३४ ॥

कुरुस्तु सप्तमस्तेषां भद्राश्वश्चाष्टमः स्मृतः ।
नवमः केतुमालश्च तन्नाम्ना वर्षसंस्थितिः ॥५३.३५ ॥

यानि किपुरुषाद्यानि वर्जयित्वा हिमाह्वयम् ।
तेषां स्वबावतः सिद्धिः सुखप्राया ह्ययत्नतः ॥५३.३६ ॥

विपर्ययो न तेष्वस्ति जरामृत्युभयं न च ।
धर्माधर्मौ न तेष्वास्तां नोत्तमाधममध्यमाः ॥५३.३७ ॥

न वै चतुर्युगावस्था नार्तवा ऋतवो न च ।
आग्नीध्रसूनोर्नाभेस्तु ऋषभोऽभूत् सुतो द्विज ॥५३.३८ ॥

ऋषभाद्भरतो जज्ञे वीरः पुत्रशताद्वरः ।
सोऽभिषिच्यर्षभः पुत्रं महाप्रव्राज्यमास्थितः ॥५३.३९ ॥

तपस्तेपे महाभागः पुलहाश्रमसंश्रयः ।
हिमाह्विं दक्षिणं वर्षं भरताय पिता ददौ ॥५३.४० ॥

तस्मात् तु भारतं वर्षं तस्य नान्मा महात्मनः ।
भतस्याप्यभूत् पुत्रः सुमतिर्नाम धार्मिकः ॥५३.४१ ॥

तस्मिन् राज्यं समावेश्य भरतोऽपि वनं ययौ ।
एतेषां पुत्रपौत्रैस्तु सप्तद्वीपा वसुन्धरा ॥५३.४२ ॥

प्रियव्रतस्य पुत्रैस्तु भुक्ता स्वायम्भुवेऽन्तरे ।
एष स्वायम्भुवः सर्गः कथितस्ते द्विजोत्तम ॥५३.४३ ॥

पूर्वमन्वन्तरे सम्यक् किमन्यत् कथयामि ते ॥५३.४४ ॥

इति श्रीमार्कण्डेयपुराणेठमन्वन्तरकथनंऽ नाम त्रिपञ्चाशोऽध्यायः

चतुःपञ्चाशोऽध्यायः-५४

क्रौष्टुकिरुवाच

कतिद्वीपाः समुद्रा वा पर्वता वा कति द्विज ।
कियन्ति चैव वर्षाणि तेषां नद्यश्च का मुने ॥५४.१॥

महाभूतप्रमाणञ्च लोकालोकन्तथैव च ।
पर्यासं परिमाणञ्च गतिञ्चन्द्रार्कयोरपि ॥५४.२॥

एतत् प्रब्रूहि मे सर्वं विस्तरेण महामुने ॥५४.३॥

मार्कण्डेय उवाच

शतार्धकोटिविस्तारा पृथिवी कृत्स्नशो द्विज ।
तस्या हि स्थानमखिलं कथयामि शृणुष्व तत् ॥५४.४॥

ये ते द्वीपा मया प्रोक्ता जम्बुद्वीपादयो द्विज ।
पुष्करान्ता महाभाग ! शृण्वेषां विस्तरं पुनः ॥५४.५॥

द्वीपात् तु द्विगुणो द्वीपो जम्बुः प्लक्षोऽथ शाल्मलः ।
कुशः क्रौञ्चस्तथा शाकः पुष्करद्वीप एव च ॥५४.६॥

लवणेक्षु-सुरा-सर्पिर्दधि-दुग्धः जलाब्धिभिः ।
द्विगुणैर्द्विगुणैर्वृद्ध्या सर्वतः परिवेष्टिताः ॥५४.७॥

जम्बुद्वीपस्य संस्थानं प्रवक्षयेऽहं निबोध मे ।
लक्षमेकं योजनानां वृत्तौ विस्तारदैर्घ्यतः ॥५४.८॥

हिमवान् हेमकूटश्च ऋषभो मेरुरेव च ।
नील: श्वेतस्तथा शृङ्गी सप्तास्मिन् वर्षपर्वता: ॥५४.९ ॥

द्वौ लक्षयोजनायामौ मध्ये तत्र महाचलौ ।
तयोर्दक्षिणतो यौ तु यौ तथोत्तरतो गिरी ॥५४.१० ॥

दशभिर्दशभिर्न्यूनै: सहस्रैस्तै: परस्परम् ।
द्विसाहस्त्रोच्छ्रया: सर्वे तावद्विस्तारिणश्च ते ॥५४.११ ॥

समुद्रान्त: प्रविष्टाश्च षडस्मिन् वर्षपर्वता: ।
दक्षिणोत्तरतो निम्ना मध्ये तुङ्गायता क्षिति: ॥५४.१२ ॥

वेद्यर्धे दक्षिमे त्रीणि त्रीणि वर्षाणि चोत्तरे ।
इलावृतं तयोर्मध्ये चन्द्रार्धाकारवत् स्थितम् ॥५४.१३ ॥

तत: पूर्वेण भद्राश्वं केतुमालञ्च पश्चिमे ।
इलावृतस्य मध्ये तु मेरु: कनकपर्वत: ॥५४.१४ ॥

चतुरशीतिसाहस्त्रस्तस्योच्छ्रायो महागिरे: ।
प्रविष्ट: षोडशाधस्ताद्विस्तीर्ण: षोडशैव तु ॥५४.१५ ॥

शरावसंस्थितत्वाच्च द्वात्रिंशन्मूर्ध्नि विस्तृत: ।
शुक्ल: पीतोऽसितो रक्त: प्राच्यादिषु यथाक्रमम् ॥५४.१६ ॥

विप्रो वैश्यस्तथा शूद्र: क्षत्रियश्च स्ववर्णत: ।
तस्योपरि तथैवाष्टौ पुर्यो दिक्षु यथाक्रमम् ॥५४.१७ ॥

इन्द्रादिलोकपालानां तन्मध्ये ब्रह्मण: सभा ।
योजनानां सहस्राणि चतुर्दश समुच्छ्रिता ॥५४.१८ ॥

अयुतोच्छ्रायास्तस्याधस्तथा विषकम्भवर्वताः ।
प्राच्यादिषु क्रमेणैव मन्दरो गन्धमादनः ॥५४.१९ ॥

विपुलश्च सुपार्श्वश्च केतुपादपशोभिताः ।
कदम्बो मन्दरे केतुर्जम्बुव गन्धमादने ॥५४.२० ॥

विपुले च तथाश्वत्थः सुपार्श्वे च वटो महान् ।
एकादशशतायामा योजनानामिमे नगाः ॥५४.२१ ॥

जठरो देवकूटश्च पूर्वस्यां दिशि पर्वतौ ।
आनीलनिषधौ प्राप्तौ परस्परनिरन्तरौ ॥५४.२२ ॥

निषधः पारियात्रश्च मेरोः पार्श्वे तु पश्चिमे ।
यथा पूर्वौ तथा चैतावानीलनिषधायतौ ॥५४.२३ ॥

कैलासो हिमवांश्चैव दक्षिणेन महाचलौ ।
पूर्वपश्चायतावेतावर्णवान्तर्व्यवस्थितौ ॥५४.२४ ॥

शृङ्गवान् जारुधिश्चैव तथैवोत्तरपर्वतौ ।
यतैव दक्षिणे तद्वदर्णप्वान्तर्व्यवस्थितौ ॥५४.२५ ॥

मर्यादापर्वता ह्येते कथ्यन्तेऽष्टौ द्विजोत्तम ।
हिमवद्धेमकूटादिपर्वतानां परस्परम् ॥५४.२६ ॥

नवयोजनसाहस्त्रं प्रागुदग्दक्षिणोत्तरम् ।
मेरोरिलावृते तद्वदन्तरे वै चतुर्दिशम् ॥५४.२७ ॥

फलानि यानि वै जम्ब्वाः गन्धमादनपर्वते ।
गजदेहप्रमाणानि पतन्ति गिरिमूर्धनि ॥५४.२८ ॥

तेषां स्त्रावात् प्रभवति ख्याता जम्बूनदीति वै ।
यत्र जाम्बूनदं नाम कनकं सम्प्रजायते ॥५४.२९ ॥

सा परिक्रम्य वै मेरुं जम्बूमूलं पुनर्नदी ।
विशति द्विजशार्दूल ! पीयमाना जनैश्च तैः ॥५४.३० ॥

भद्राश्वेऽश्वशिरा विष्णुर्भारते कूर्मसंस्थितिः ।
वराहः केतुमाले च मत्स्यरूपस्तथोत्तरे ॥५४.३१ ॥

तेषु नक्षत्रविन्यासाद्विषयाः समवस्थिताः ।
चतुर्ष्वपि द्विजश्रेष्ठ ! ग्रहाभिभवपाठकाः ॥५४.३२ ॥

इति श्रीमार्कण्डेयपुराणे भुवनकोशठजम्बूद्वीपवर्णनंऽ नाम चतुःपञ्चाशोऽध्याय

पञ्चपञ्चाशोऽध्यायः- ५५

मार्कण्डेय उवाच

शैलेषु मन्दाराद्येषु चतुर्ष्वपि द्विजोत्तम ।
वाननि यानि चत्वारि सरांसि च निबोध मे ॥५५.१ ॥

पूर्वं चैत्ररथं नाम दक्षिणे नन्दनं वनम् ।
वैभ्राजं पश्चिमे शैले सावित्रं चोत्तराचले ॥५५.२ ॥

अरुणोदं सरः पूर्वं मानसं दक्षिणे तथा ।
शीतोदं पश्चिमे मेरोर्महाभद्रं तथोत्तरे ॥५५.३ ॥

शीतार्तश्चक्रमुञ्जश्च कुलीरोऽथ सुकङ्कवान् ।
मणिशैलोऽथ वृषवान् महानीलो भवाचलः ॥५५.४ ॥

सूबिन्दुर्मन्दरो वेणुस्तामसो निषधस्तथा ।
देवशैलश्च पूर्वेण मन्दरस्य महाचलः ॥५५.५ ॥

त्रिकटशिखराद्रिश्च कलिङ्गोऽथ पतङ्गकः ।
रुचकः सानुमांश्चाद्रिस्ताम्रकोऽथ विशाखवान् ॥५५.६ ॥

श्वेतोदरः समूलश्च वसुधारश्च रत्नवान् ।
एकशृङ्गो महाशैलो राजशालः पिपाठकः ॥५५.७ ॥

पञ्चशैलोऽथ कैलासो हिमवांश्चाचलोत्तमः ।
इत्येते दक्षिणे पार्श्वे मेरोः प्रोक्ता महाचलाः ॥५५.८ ॥

सुरक्षः शिशिराक्षश्च वैदुर्यः कपिलस्तथा ।
पिञ्जरोऽथ महाभद्रः सुरसः पिङ्गलो मधुः ॥५५.९ ॥

अञ्जनः कुक्कुटः कृष्णः पाण्डरश्चालोत्तमः ।
सहस्रशिखरश्चाद्रिः पारियात्रः सशृङ्गवान् ॥५५.१० ॥

पश्चिमेन तथा मेरोर्विस्कम्भात् पश्चिमाद्बहिः ।
एतेऽचलाः समाख्याताः शृणुष्वन्यांस्तथोत्तरान् ॥५५.११ ॥

शङ्खकूटोऽथ वृषभो हंसनाभस्तथाचलः ।
कपिलेन्द्रस्तथा शैलः सानुमान् नील एव च ॥५५.१२ ॥

स्वर्णशृङ्गी शातशृङ्गी पुष्पको मेघपर्वतः ।
विरजाक्षो वराहाद्रिर्मयूरो जारुधिस्तथा ॥५५.१३ ॥

इत्येते कथिता ब्रह्मन् ! मेरोरुत्तरतो नगाः ।
एतेषां पर्वतानान्तु द्रौण्योऽतीव मनोहराः ॥५५.१४ ॥

वनैरमलपानीयैः सरोभिरुपशोभिताः ।
तासु पुण्यकृतां जन्म मनुष्याणां द्विजोत्तम ॥५५.१५ ॥

एते भौमा द्विजश्रेष्ठ ! स्वर्गाः स्वर्गगुणाधिकाः ।
न तासु पुण्यपापानामपूर्वाणामुपार्जनम् ॥५५.१६ ॥

पुण्योपभोगा एवोक्ता देवानामपि तास्वपि ।
शीतान्ताद्येषु चैतषु शैलेषु द्विजसत्तम ॥५५.१७ ॥

विद्याधराणां यक्षाणां किन्नरोरगरक्षसाम् ।
देवानाञ्च महावासा गन्धर्वाणां च शोभनाः ॥५५.१८ ॥

महापुण्या मनोज्ञैश्च सदैवोपवनैर्युताः ।
सरांसि च मनोज्ञानि सर्वर्तुसुखदोऽनिलः ॥५५.१९ ॥

न चैतेषु मनुष्याणां वैमनस्यानि कुत्रचित् ।
तदेवं पार्थिवं पद्मं चतुष्पत्रं मयोदितम् ॥५५.२० ॥

भद्राश्वभारताद्यानि पत्राण्यस्य चतुर्दिशम् ।
भारतं नाम यद्वर्षं दक्षिणेन मयोदितम् ॥५५.२१ ॥

तत् कर्मभूमिर्नान्यत्र संप्राप्तिः पुण्यपापयोः ।
एतत् प्रधानं विज्ञेयं यत्र सर्वं प्रतिष्ठितम् ॥५५.२२ ॥

तस्मात् स्वर्गापवर्गौ च मानुष्यनारकावपि ।
तिर्यक्त्वमथवाप्यन्यत् नरः प्राप्नोति वै द्विज ॥५५.२३ ॥

इति श्रीमार्कण्डेयपुराणे भुवनकोशे पञ्चपञ्चाशोऽध्यायः

About this digital edition

This e-book comes from the online library Wikisource[1]. This multilingual digital library, built by volunteers, is committed to developing a free accessible collection of publications of every kind: novels, poems, magazines, letters...

Wikisource is constantly looking for new members. During the realization of this book, it's possible that we made some errors. You can report them at this page[4].

The following users contributed to this book:

- Puranastudy
- अनुनाद सिंह

1. ↑ https://wikisource.org
2. ↑ https://www.creativecommons.org/licenses/by-sa/3.0
3. ↑ https://www.gnu.org/copyleft/fdl.html
4. ↑ https://wikisource.org/wiki/Wikisource:Scriptorium